# श्री वेंकटेश्वर अष्टकम्

शेषाद्रिवासं शरदिंदुहासं
श्रृंगारमूर्तिं शुभदानकीर्तिं ।
श्री श्रीनिवासं शिवदेव सेव्यं
श्री वेंकटेशं शिरसा नमामि ॥ 1

सप्तादि्र देवं सुरराज सेव्यं
संताप नाशं सुविलास कोशं ।
सप्ताश्व भासं सुमनोज्ञ भूषं
श्री वेंकटेशं शिरसा नमामि ॥ 2

भूलोक पुण्यं भुवनैक गण्यं
भोगींद्र चक्रं भवरोग वैद्यं ।
भास्वत्किरीटं बहु भाग्यवंतं
श्री वेंकटेशं शिरसा नमामि ॥ 3

लोकांतरंगं लयकार मित्रं
लक्ष्मीकलत्रं ललिताब्ज नेत्रं ।
श्री विष्णु देवं सुजनैक गम्यं
श्री वेंकटेशं शिरसा नमामि ॥ 4

© 2022 Vedam Nadam

वीराधि वीरं विहगादि रूढं
वेदांत वेद्यं विबुधालि वंद्यं ।
वागीश मूलं वरपुष्पमालिं
श्री वेंकटेशं शिरसा नमामि ॥ 5

संग्राम भीमं सुजनाभि रामं
संकल्प पूरं समता प्रचारं ।
सर्वत्र संस्थं सकलागमस्तं
श्री वेंकटेशं शिरसा नमामि ॥ 6

श्री चूर्णफालं सुगुणालवालं
श्री पुत्रतातं शुकमुख्य गीतं ।
श्री सुंदरीशं शिशिरांत रंगं
श्री वेंकटेशं शिरसा नमामि ॥ 7

संमोह दूरं श्रृति शीर्षसारं
दाक्षिण्यभावं दरहास शोभं ।
राजाधि राजं रमया विहारं
श्री वेंकटेशं शिरसा नमामि ॥ 8

॥ ओं नमो वेंकटेश्वर नमो नमः ॥
॥ इति श्री वेंकटेश्वर अष्टकम् संपूर्णम् ॥

© 2022 Vedam Nadam